# .. pradoShastotrAShTakam ..

## ॥ प्रदोषस्तोत्राष्टकम् ॥

श्री गणेशाय नमः ।
सत्यं ब्रवीमि परलोकहितं ब्रवीमि
सारं ब्रवीम्युपनिषद्धृदयं ब्रवीमि ।
संसारमुल्बणमसारमवाप्य जन्तोः
सारोऽयमीश्वरपदाम्बुरुहस्य सेवा ॥ १॥
ये नार्चयन्ति गिरिशं समये प्रदोषे
ये नार्चितं शिवमपि प्रणमन्ति चान्ये ।
एतत्कथां श्रुतिपुटैर्न पिबन्ति मूढास्ते
जन्मजन्मसु भवन्ति नरा दरिद्राः ॥ २॥
ये वै प्रदोषसमये परमेश्वरस्य,
कुर्वन्त्यनन्यमनसोंऽघ्रिसरोजपूजाम् ।
नित्यं प्रवृद्धधनधान्यकलत्रपुत्रसौभाग्य-
सम्पदधिकास्त इहैव लोके ॥ ३॥
कैलासशैलभुवने त्रिजगज्जनित्रीं गौरीं
निवेश्य कनकाचितरत्नपीठे ।
नृत्यं विधातुमभिवाञ्छति शूलपाणौ
देवाः प्रदोषसमये नु भजन्ति सर्वे ॥ ४॥
वाग्देवी धृतवल्लकी शतमखो वेणुं दधत्पद्मज-
स्तालोन्निद्रकरो रमा भगवती गेयप्रयोगान्विता ।
विष्णुः सान्द्रमृदङ्गवादनपटुर्देवाः समन्तात्स्थिताः
सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ५॥
गन्धर्वयक्षपतगोरगसिद्धसाध्य-
विद्याधरामरवराप्सरसां गणांश्च ।
येऽन्ये त्रिलोकनिलया सहभूतवर्गाः
प्राप्ते प्रदोषसमये हरपार्श्वसंस्थाः ॥ ६॥
अतः प्रदोषे शिव एक एव
पूज्योऽथ नान्ये हरिपद्मजाद्याः ।
तस्मिन्महेशे विधिनेज्यमाने
सर्वे प्रसीदन्ति सुराधिनाथाः ॥ ७॥
एष ते तनयः पूर्वजन्मनि ब्राह्मणोत्तमः ।
प्रतिग्रहैर्वयो निन्ये न दानाद्यैः सुकर्मभिः ॥ ८॥
अतो दारिद्र्यमापन्नः पुत्रस्ते द्विजभामिनि ।

तद्दोषपरिहारार्थं शरणां यातु शङ्करम् ॥ ९ ॥
॥ इति श्रीस्कान्दोक्तं प्रदोषस्तोत्राष्टकं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated January 1, 2005